# Paratvadipanchakam

# પરત્વાદિપઞ્ચકમ્

## Document Information

Text title : Paratvadipanchakam

File name : paratvAdipanchakam.itx

Category : vishhnu, panchaka

Location : doc_vishhnu

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Ramanuja Stotramala

Latest update : April 29, 2021, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

July 5, 2021

*sanskritdocuments.org*

# પરત્વાદિપઞ્ચકમ્

શ્રીવાત્સ્યવરદગુરુભિરનુગૃહીતં
શ્રીરસ્તુ ।
શ્રીમતે હયગ્રીવાય નમઃ ।
શ્રીમતે રામાનુજાય નમઃ ॥

વન્દેઽહં વરદાર્યં તં વત્સાભિજનભૂષણમ્ ।
ભાષ્યામૃતપ્રદાનાદ્યઃ સઞ્જીવયતિ મામપિ ॥

ઉદ્યદ્ભાનુસહસ્રભાસ્વરપરવ્યોમાસ્પદં નિર્મલ-
    જ્ઞાનાનન્દઘનસ્વરૂપમમલજ્ઞાનાદિભિષ્ષડ્ગુણૈઃ ।
જુષ્ટં સૂરિજનાધિપં ધૃતરથાઙ્ગાબ્જં સુભૂષોજ્જ્વલં
    શ્રીભૂસેવ્યમનન્તભોગિનિલયં શ્રીવાસુદેવં ભજે ॥ ૧॥

આમોદે ભુવને પ્રમોદ ઉત સમ્મોદે ચ સઙ્કર્ષણં
    પ્રદ્યુમ્નં ચ તથાઽનિરુદ્ધમપિ તાન્ સૃષ્ટિસ્થિતી ચાપ્યયમ્ ।
કુર્વાણાન્ મતિમુખ્યષડ્ગુણવરૈર્યુક્તાંસ્ત્રિયુગ્માત્મકૈઃ
    વ્યૂહાધિષ્ઠિતવાસુદેવમપિ તં ક્ષીરાબ્ધિનાથં ભજે ॥ ૨॥

વેદાન્વેષણમન્દરાદ્રિભરણ ક્ષ્મોદ્ધારણસ્વાશ્રિત-
    પ્રહ્લાદાવનભૂમિભિક્ષણજગદ્વિક્રાન્તયો યત્ક્રિયાઃ ।
દુષ્ટક્ષત્રનિબર્હણં દશમુખાદ્યુન્મૂલનં કર્ષણં
    કાલિન્દ્યા અતિપાપકંસનિધનં યત્ક્રીડિતં તં નુમઃ ॥ ૩॥

યો દેવાદિચતુર્વિધેષ્ટજનિષુ બ્રહ્માણ્ડકોશાન્તરે
    સમ્ભક્તેષુ ચરાચરેષુ નિવસન્નાસ્તે સદાન્તર્બહિઃ ।
વિષ્ણું તં નિખિલેષ્વણુષ્વણુતરં ભૂયસ્સુ ભૂયસ્તરં
    સ્વાઙ્ગુષ્ઠપ્રમિતં ચ યોગિહૃદયેષ્વાસીનમીશં ભજે ॥ ૪॥

શ્રીરઙ્ગસ્થલવેઙ્કટાદ્રિકરિગિર્યાદૌ શતેઽષ્ટોત્તરે

સ્થાને ગ્રામનિકેતનેષુ ચ સદા સાન્નિધ્યમાસેદુષે ।
અર્ચારૂપિણમર્ચકાભિમતિતઃ સ્વીકુર્વતે વિગ્રહં
પૂજાં ચાખિલવાઞ્છિતાન્ વિતરતે શ્રીશાય તસ્મૈ નમઃ ॥ ૫॥

પ્રાતર્વિષ્ણોઃ પરત્વાદિપઞ્ચકસ્તુતિમુત્તમામ્ ।
પઠન્ પ્રાપ્નોતિ ભગવદ્ભક્તિં વરદનિર્મિતામ્ ॥ ૬॥

ઇતિ પરત્વાદિપઞ્ચકં સમાપ્તમ્ ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Paratvadipanchakam*
pdf was typeset on July 5, 2021

Please send corrections to *sanskrit@cheerful.com*